Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

* अथ *

# श्रीपञ्चमी ( वसन्तपञ्चमी ) व्रतपूजनप्रयोगः

* प्रारभ्यते *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

* अथ *

# श्रीपञ्चमी (वसन्तपञ्चमी) व्रतपूजनप्रयोगः।

माघशुक्लपञ्चमी श्रीपञ्चमी। अस्यां रतिकामयोः पूजनादिना वसन्तमहोत्सवः कार्यः—

माघमासे सुरश्रेष्ठ शुक्लायां पञ्चमीतिथौ। रतिकामौ तु सम्पूज्य कर्त्तव्यः सुमहोत्सवः॥ दानानि च प्रदेयानि तेन तुष्यति माधवः॥ इति पुराणसमुच्चयात्। मध्याह्नः कर्मकालः पूजाव्रतत्वात्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ❋ अथ पूजाप्रयोगः ❋

कर्ता कृततिलको बद्धशिखः स्वासने प्राङ्मुख उपविश्य दीपं प्रज्वलय्य अर्घ्यं संस्थाप्य आचम्य प्राणानायम्य पूजनसामग्रीमात्मानञ्च सम्प्रोक्ष्य शान्तिपाठं पठेत्।

हरिः ॐ आ नो भद्राः क्रतवो यन्तु विश्वतोऽदब्धासोऽअपरीतासऽ उद्भिदः। देवा नो यथा सदमिद् वृधेऽ असन्नप्रायुवो रक्षितारो दिवे दिवे॥१॥ देवानां भद्रा सुमतिर्ऋजूयतान्देवानाᳬं रातिरभि नो निवर्त्तताम्। देवानाᳬं सख्यमुपसेदिमा वयन्देवा नऽ आयुः प्रतिरन्तु जीवसे॥ २॥ तान्पूर्व्वया निविदा हूमहे वयम्भगम्मित्रमदितिन्दक्षमस्रिधम्। अर्यमणं वरुणᳬं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सोममश्विना सरस्वती नः सुभगा मयस्करत् ॥ ३ ॥ तन्नो व्वातो मयोभु व्वातु भेषजन्तन्माता पृथिवी तत्पिता द्यौः । तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुतन्धिष्ण्या युवम् ॥ ४ ॥ तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्वमवसे हूमहे व्वयम् । पूषा नो यथा व्वेदसामसद् वृधे रक्षिता पायुरदब्धः स्वस्तये ॥ ५ ॥ स्वस्तिन ऽइन्द्रो व्वृद्धश्रवाः स्वस्ति नः पूषा व्विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो ऽअरिष्टनेमिः स्वस्ति नो बृहस्पतिर्द्दधातु ॥६॥ पृषदश्वा मरुतः पृश्निमातरः शुभँय्यावानो व्विदथेषु जग्मयः । अग्निजिह्वा मनवः सूरचक्षसो व्विश्वे नो देवा ऽअवसाऽऽगमन्निह ॥ ७ ॥ भद्रङ्कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्य्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाँ सस्त-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नृभिर्व्यशेमहि देवहितँय्यदायुः ॥ ८ ॥ शतमिन्नु शरदो ऽअन्ति देवा यत्रा नश्चक्रा जरसन्तनूनाम् । पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः ॥ ९ ॥ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्म्माता स पिता स पुत्रः। व्विश्वे देवा ऽअदितिः पञ्च जना ऽअदितिर्ज्जातमदितिर्ज्जनित्वम् ॥ १० ॥ द्यौः शान्तिरन्तरिक्षँ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। व्वनस्पतयः शान्तिर्व्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्वँ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥ ११ ॥ यतोयतः समीहसे ततो नो ऽअभयङ्कुरु । शन्नः कुरु प्रजाभ्योऽभयन्नः पशुभ्यः ॥ १२ ॥ गणानां त्वा गणपतिँ हवामहे प्रियाणां त्वा प्रियपतिँ हवामहे निधीनां त्वा निधिपतिँ

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हवामहे व्वसो मम । आऽहमजानि गर्ब्भधमा त्वमजासि गर्ब्भधम् ॥ १३ ॥ अम्बेऽ अम्बिकेऽम्बालिके न मा नयति कश्चन । स सस्त्यश्वकः सुभद्रिका-ङ्काम्पीलवासिनीम् ॥ १४ ॥ सुशान्तिर्भवतु ॥ इति शान्तिपाठं पठित्वा ॥

ॐ लक्ष्मीनारायणाभ्यां नमः । ॐ उमामहेश्वराभ्यां नमः । ॐ वाणी-हिरण्यगर्भाभ्यां नमः । ॐ शचीपुरन्दराभ्यां नमः । ॐ मातापितृचरणकम-लेभ्यो नमः । ॐ इष्टदेवताभ्यो नमः । ॐ कुलदेवताभ्यो नमः । ॐ ग्राम-देवताभ्यो नमः । ॐ स्थानदेवताभ्यो नमः । ॐ वास्तुदेवताभ्यो नमः । ॐ सर्वेभ्यो देवेभ्यो नमः । ॐ सर्वेभ्यो ब्राह्मणेभ्यो नमः । ॐ सिद्धिबुद्धि-सहिताय श्रीमन्महागणाधिपतये नमः । इति प्रणम्य—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ॐ सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः । लम्बोदरश्च विकटो विघ्ननाशो विनायकः ॥ १ ॥ धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः । द्वादशैतानि नमानि यः पठेच्छृणुयादपि ॥ २ ॥ विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा । सङ्ग्रामे सङ्कटे चैव विघ्नस्तस्य न जायते ॥ ३ ॥ शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम् । प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये॥४॥ अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः । सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ॥ ५ ॥ सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके । शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥ ६ ॥ सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम् । येषां हृदिस्थो भगवान् मङ्गलायतनं हरिः ॥ ७ ॥ तदेव लग्नं सुदिनं तदेव तारा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बलं चन्द्रबलं तदेव । विद्याबलं दैवबलं तदेव लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि ॥ ८ ॥ लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः । येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः ॥ ९ ॥ यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्द्धरः । तत्र श्रीर्विजयो भूतिर्ध्रुवानीतिर्मतिर्मम ॥ १० ॥ अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते । तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥ ११ ॥ स्मृते सकलकल्याणभाजनं यत्र जायते । पुरुषं तमजं नित्यं व्रजामि शरणं हरिम् ॥ १२ ॥ सर्वेष्वारम्भकार्येषु त्रयस्त्रिभुवनेश्वराः । देवा दिशन्तु नः सिद्धिं ब्रह्मेशानजनार्दनाः ॥ १३ ॥ विश्वेशं माधवं ढुण्ढिं दण्डपाणिञ्च भैरवम् । वन्दे काशीं गुहां गङ्गां भवानीं मणिकर्णिकाम् ॥ १४ ॥ ततः सङ्कल्पं कुर्यात् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ॐ विष्णुः ३ अद्येह अमुकोऽहमायुरारोग्यहर्षविजयप्राप्तिकामः कलशे आदित्यादि नवग्रहाणां रतिकामयोश्च पूजनं करिष्ये । तत्रादौ निर्विघ्नतासिद्ध्यर्थं गणेशाम्बिकयोः पूजनं च करिष्ये । इति सङ्कल्प्य—

ॐगणानान्त्वा गणपतिँ हवामहे प्रियाणान्त्वा प्रियपतिँ हवामहे निधीनान्त्वा निधिपतिँ हवामहे व्वसोमम । आऽहमजानि गर्ब्भधमा त्वमजासि गर्ब्भधम् ॥ ॐ भूर्भुवः स्वः गणपतये नमः साङ्गं सायुधं सवाहनं सपरिवारं सशक्तिकं गणपतिमावाहयामि स्थापयामि । इति गणपतिं स्थापयित्वा तदुत्तरतोऽम्बिकां स्थापयेत् । ॐ अम्बे अम्बिकेऽम्बालिके न मानयति कश्चन । स सस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम् ॥ ॐ भूर्भुवः स्वः अम्बिकायै

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नमः । साङ्गां सायुधां सवाहनां सपरिवारां सशक्तिकामम्बिकामावाहयामि स्थापयामि । इत्यम्बिकां स्थापयित्वा ततः — ॐ मनोजूतिर्ज्जुषतामाज्यस्य बृहस्पतिर्य्यज्ञमिमन्तनोत्वरिष्टं य्यज्ञ ᳪ᳭ समिमन्दधातु । विश्वे देवास ऽइह मादयन्तामोँ ३॥म्प्रतिष्ठ ॥

ॐ भूर्भुवः स्वः साङ्गाभ्यां सपरिवाराभ्यां सायुधाभ्यां सशक्तिकाभ्यां गणेशाम्बिकाभ्यां नमः, इति नाममन्त्रैः तत्तन्मन्त्रैर्वा सम्पूज्य मन्त्रपुष्पाञ्जलिं समर्प्य विशेषार्घ्यं दद्यात् । तत्र मन्त्रः —

ॐ रक्ष रक्ष गणाध्यक्ष रक्ष त्रैलोक्यरक्षक । भक्तानामभयंकर्ता त्राता भव भवार्णवात् ॥ १ ॥ द्वैमातुर कृपासिन्धो षाण्मातुराग्रज प्रभो । वरद

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वं वरं देहि वाञ्छितं वाञ्छितार्थद ॥ २ ॥ अनेन सफलार्घेण फलदोऽस्तु सदा मम ॥ ३ ॥ ॐ महागणपतये नमः विशेषार्घं समर्पयामि । इत्यर्घं दत्त्वा पूर्ववदर्घ्यपात्रे गन्धादि दत्त्वा—

रूपं देहि जयं देहि सौभाग्यं देहि देवि मे । पुत्रान् देहि धनं देहि सर्वान् कामांश्च देहि मे ॥ ॐ अम्बिकायै नमः विशेषार्घं समर्पयामि । इत्यर्घं दत्त्वा प्रार्थयेत्—

ॐ विघ्नेश्वराय वरदाय सुरप्रियाय लम्बोदराय सकलाय जगद्धिताय । नागाननाय श्रुतियज्ञविभूषिताय गौरीसुताय गणनाथ नमो नमस्ते ॥ १ ॥ भक्तार्त्तिनाशनपराय गणेश्वराय सर्वेश्वराय शुभदाय सुरेश्वराय । विद्या-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धराय विकटाय च वामनाय भक्तप्रसन्नवरदाय नमो नमस्ते॥ २ ॥ नमस्ते ब्रह्मरूपाय विष्णुरूपाय ते नमः । नमस्ते करिरूपाय रुद्ररूपाय ते नमः ॥३॥ विश्वरूपस्वरूपाय नमस्ते ब्रह्मचारिणे । भक्तप्रियाय देवाय नमस्तुभ्यं विनायक ॥ ४ ॥ लम्बोदर नमस्तुभ्यं सततं मोदकप्रिय । निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥ ५ ॥ त्वां विघ्नशत्रुदलनेति च सुन्दरेति भक्तप्रियेति सुखदेति फलप्रदेति । विद्याप्रदेत्यघहरेति च ये स्तुवन्ति तेभ्यो गणेश वरदो भव नित्यमेव ॥ ६ ॥ अनया पूजया गणेशाम्बिके प्रीयेतां न मम । इति गौरीगणपतिपूजनप्रयोगः ॥

अथ कलशस्थापनम् । ॐ महीद्यौः पृथिवी चनऽइमं यज्ञमिमिक्षताम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पितृतान्नो भरीमभिः ॥ इति मन्त्रेण कलशाधारस्थलं संस्कृत्य तत्र रङ्गवल्लीपद्मं विधाय—ॐ धान्यमसि धिनुहि देवान् प्राणायत्वोदानायत्वा व्व्यानायत्वा । दीर्घामनुप्रसीति मायुषेधान्देवोवः सविता हिरण्यपाणिः प्रति गृभ्णात्वच्छिद्रेण पाणिना चक्षुषे त्वा महीनाम्पयोसि ॥ इति मन्त्रेण पृष्ठदेशे प्रस्थपरिमितं सप्तधान्यपुञ्जं विकिरेत् । ॐ आजिघ्र कलशं मह्या त्वा व्विशन्त्विन्दवः । पुनरूर्जा निवर्तस्व सा नः सहस्रं धुक्ष्वोरुधारा पयस्वती पुनर्मा व्विशताद्रयिः ॥ इति मन्त्रेण धान्यपुञ्जोपरि चन्दनेनानुलिप्तं पुष्पाद्यलङ्कृतं हेमराजतताम्रादिनिर्मितं त्रिसूत्रिवेष्टितकण्ठं कलशं संस्थाप्य—ॐ व्वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनी स्थो व्वरुणस्यऋतसदन्न्यसि

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्वरुणस्य ऽऋतसदनमसि व्वरुणस्यऽऋतसदनमासीद ॥ इति मन्त्रेण तत्र जलं पूरयेत् । ॐ त्वां गन्धर्वा अखनंस्त्वामिन्द्रस्त्वां बृहस्पतिः । त्वामोषधे सोमो राजा विद्वान्यक्ष्मादमुच्यतः ॥ इति मन्त्रेण कलशे गन्धं प्रक्षिप्य — ॐ्याऽओषधीः पूर्वा जाता देवेभ्यस्त्रियुगम्पुरा । मनै नु बभ्रूणामहꣳ शतं धामानि सप्त च ॥ इति मन्त्रेण तस्मिन् कुष्ठमासिहरिद्रामूराशिलाजतुचन्दन-कचोरचम्पत्वक्मुस्तात्मिका सर्वौषधीः सहैव प्रक्षिप्य——ॐ काण्डात्काण्डात्प्र-रोहन्ति परुषः परुषस्परि । एवानो दूर्वे प्रतनु सहस्रेण शतेन च ॥ इति मन्त्रेण दूर्वाः प्रक्षिप्य—ॐ अश्वत्थे वो निषदनम्पर्णो वो व्वसतिष्कृता । गोभाज ऽइत्किला सथ यत्सनवथ पूरुषम् ॥ इति मन्त्रेण तत्र न्यग्रोधपिप्पलप्लक्षज-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



म्बूचूततरूणां पञ्च पल्लवान् सहैव प्रक्षिपेत् । ॐ स्योनापृथिवि नो भवानृक्ष-ग निवेशनी । यच्छा नः शर्म सप्रथाः ॥ इति मन्त्रेण तत्र ( कलशे ) अश्वस्थानगजस्थानवल्मीकसङ्गमह्रदराजद्वारगोष्ठप्रदेशादाहृताः सप्त मृदः सहैव प्रक्षिप्य—ॐ या फलिनीर्या ऽअफलाऽअपुष्पा याश्च पुष्पिणीः । बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वꣳ हसः ॥ इति मन्त्रेण तत्र पूगफलं प्रक्षिप्य—ॐपरिवाजपतिः कविरग्निर्हव्यान्यक्रमीत् । दधद्रत्नानि दाशुषे ॥ इति मन्त्रेण सुवर्णरजतमुक्तामाणिक्यप्रवालात्मकानि पञ्च रत्नानि सहैव प्रक्षिप्य—ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक ऽआसीत् । स दाधार पृथिवीं द्यामुतेमा कस्मै देवाय हविषा विधेम ॥ इति मन्त्रेण तत्र हिरण्यं प्रक्षिपेत् ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ॐ सुजातो ज्योतिषा सह शर्मंव्वरूथमासदत्स्वः ॥ व्वासोऽअग्ने व्विश्वरूपठं संव्ययस्व विभावसो ॥ इति मन्त्रेण तत्र वस्त्रयुग्मेन कलशं संवेष्ट्य — ॐ पूर्णा दर्व्वि परा पत सुपूर्णा पुनरापत । वस्नेव व्विक्रीणावहाऽइषमूर्ज्जंठं. शतक्रतो॥ इति मन्त्रेण धान्यपूर्णपात्रं कलशे स्थापयेत् । ततः — ॐ या फलिनीर्या ऽअफलाऽअपुष्पा याश्च पुष्पिणीः । बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वठं. हसः ॥ इति मन्त्रेण कलशोपरि सम्मुखं नारिकेलं संस्थाप्य । ततः — ॐ तत्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः। अहेडमानो व्वरुणेह वोध्युरुशठं स मा न आयुः प्रमोषीः ॥ इति मन्त्रेणास्मिन् वरुणं साङ्गं सपरिवारं सायुधं सशक्तिकमावाहयामि स्थापयामि । ॐ अप्पतये व्वरुणाय नमः । इत्यावाह्य

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्रैव देवता आवाहयेत् । कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः । मूले तस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥ १ ॥ कुक्षौ तु सागराः सप्त सप्तद्वीपा च मेदिनी । अर्जुनी गौतमी चैव चन्द्रभागा सरस्वती ॥ २ ॥ कावेरी कृष्णावेणी च गङ्गा चैव महानदी । तापी गोदावरी चैव माहेन्द्री नर्मदा तथा ॥ ३ ॥ नदाश्च विविधा जाता नद्यः सर्वास्तथा पराः । पृथिव्यां यानि तीर्थानि कलशस्थानि तानि वै ॥ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ॥ ४ ॥ ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ॥ ५ ॥ अङ्गैश्च सहिताः सर्वे कलशं तु समाश्रिताः । शान्तिः पुष्टिश्च सावित्री गायत्री कलशे स्थिता ॥ ६ ॥ आयान्तु मम शन्त्यर्थं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दुरितक्षयकारिकाः । "कलशाधिष्ठात्र्यो विष्ण्वादिदेवताः सुप्रतिष्ठिता भवन्तु" इत्यावाह्य मनोजूतिरिति प्रतिष्ठाप्य पञ्चोपचारैः पूजयेत्। ततो मन्त्रैः कलशं प्रार्थयेत्–देवदानवसंवादे मथ्यमाने महोदधौ। उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम् ॥ १ ॥ त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः। त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥ २ ॥ शिवः स्वयं त्वमेवासि विष्णुस्त्वञ्च प्रजापतिः। आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः ॥ ३ ॥ त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदः। त्वत्प्रसादा-दिमं यज्ञं कर्त्तुमीहे जलोद्भव ॥ ४ ॥ सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा ॥ ५ ॥ नमो नमस्ते स्फटिकप्रभाय सुश्वेतहाराय सुमङ्गलाय।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सुपाशहस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते ॥ ६ ॥ पाशपाणे नमस्तुभ्यं पद्मिनीजीवनायक । रतिकामार्चनं यावत्तावत्त्वं सन्निधो भव ॥ ७ ॥ इति ॥

तत्र सूर्याद्यावाहनम् ॥ जपाकुसुमसंकाशं काश्यपेयं महाद्युतिम् ॥ तमोऽरिं सर्वपापघ्नं सूर्यमावाहयाम्यहम् ॥ ॐ आकृष्णेनरजसाव्वर्तमानो निवेशयन्नमृतं मर्त्यञ्च ॥ हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन् ॥ ॐ भूर्भुवः स्वः कलिङ्गदेशोद्भव काश्यपसगोत्र रक्तवर्ण भो सूर्य ! इहागच्छ इह तिष्ठ सूर्याय नमः, सूर्यमावाहयामि स्थापयामि ॥ १ ॥ दधिशंखतुषाराभं क्षीरोदार्णवसंभवम् ॥ ज्योत्स्नापतिं निशानाथं सोममावा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हयाम्यहम् ॥ ॐ इमंदेवाऽअसपत्न ᳪ सुवद्ध्वंम्महतेक्षत्रायमहतेज्यैष्ठ्याय महतेजानराज्यायेन्द्रस्येन्द्रियाय ॥ इममुष्यपुत्रममुष्यैपुत्रमस्यैविशऽएषवोमी-राजा सोमोऽस्माकंब्राह्मणाना ᳪ राजा ॥ ॐभूर्भुवः स्वः यमुनातीरोद्भव आत्रेय-सगोत्र शुक्लवर्ण भो सोम ! इहागच्छ इह तिष्ठ सोमाय नमः, सोममावाहयामि स्थापयामि ॥ २ ॥ धरणीगर्भसंभूतं विद्युत्तेजस्समप्रभम् ॥ कुमारं शक्तिहस्तं च भौममावाहयाम्यहम् ॥ ॐ अग्निर्मूर्द्धादिवःककुत्पतिः पृथिव्याऽअयम् ॥ अप ᳪ रेता ᳪ सिजिन्वति ॥ ॐ भूर्भुवः स्वः अवंतिकापुरोद्भव भारद्वाजसगोत्र रक्तवर्ण भो भौम ! इ० भौमाय० भौम० ॥३॥ प्रियंगुकलिकाभासं रूपेणाप्रतिमं बुधम् ॥ सौम्यं सौम्यगुणोपेतं बुधमावाहयाम्यहम् ॥ ॐ उद्बुध्यस्वाग्ने

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रतिजागृहित्वमिष्टापूर्तेसठ्ँ. सृजेथामयं च ॥ अस्मिन्सधस्थेऽअध्युत्तरस्मिन्वि-
श्वेदेवा यजमानश्च सीदत ॥ ॐ भू० मगधदेशोद्भव आत्रेयसगोत्र हरित-
वर्ण भो बुध ! इ० बुधाय० बुधमा० ॥ ४ ॥ देवानां च मुनीनां च गुरुं का-
ञ्चनसन्निभम् ॥ वन्द्यभूतं त्रिलोकानां गुरुमावाहयाम्यहम् ॥ ५ ॥ ॐ बृहस्प-
तेऽअतियदर्योऽअर्हाद्युमद्विभाति क्रतुमज्जनेषु ॥ यद्दीदयच्छवसऽऋतप्रजात
तदस्मासु द्रविणन्धेहिचित्रम् ॥ ॐ भू० सिन्धुदेशोद्भव आङ्गिरसगोत्र पीतवर्ण
भो बृहस्पते ! इ० बृहस्पतये नमः, बृहस्पति० ॥ ५ ॥ हिमकुन्दमृणालाभं
दैत्यानां परमं गुरुम् ॥ सर्वशास्त्रप्रवक्तारं शुक्रमावाहयाम्यहम् ॥ ॐ अन्ना-
त्परिस्रुतो रसंब्रह्मणाव्यपिबत्क्षत्रं पयः सोमं प्रजापतिः ॥ ऋतेन सत्यमिन्द्रियं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विपानठं. शुक्रमन्धमऽइन्द्रस्येन्द्रियमिदंपयोमृतंमधु ॥ ॐ भू० भोजकटदेशो-द्भव भार्गवसगोत्र शुक्लवर्ण भो शुक्र ! इ० शुक्राय नमः, शुक्रं० ॥ ६ ॥ नीलाम्बुजसमाभासं रविपुत्रं यमाग्रजम् ॥ छायामार्तण्डसम्भूतं शनिमावाहयाम्यहम् ॥ ॐ शन्नो देवीरभिष्टयऽआपोभवन्तुपीतये ॥ शंय्योरभिस्रवन्तुनः ॥ ॐ भू० सौराष्ट्रदेशोद्भव काश्यपसगोत्र कृष्णवर्ण भो शनैश्चर ! इ० शनैश्चराय नमः, शनैश्चर० ॥ ७ ॥ अर्द्धकायं महावीर्यं चन्द्रादित्यविमर्दनम् ॥ सिंहिकागर्भसंभूतं राहुमावाहयाम्यहम् ॥ ॐ कयानश्चित्रऽआभुवदूतीसदावृधः सखा ॥ कयाशचिष्ठयावृता ॥ ॐ भू० राठिनापुरोद्भव पैठिनसगोत्र कृष्णवर्ण भो राहो ! इ० राहवे नमः, राहुं० ॥ ८ ॥ पालासधूम्रसंकाशं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तारकाग्रहमस्तकम् ॥ रौद्रं रौद्रात्मकं घोरं केतुमावाहयाम्यहम् ॥ ॐ केतुंकृण्व-न्नकेतवेपेशोमर्याऽअपेशसे ॥ समुषद्भिरजायथाः ॥ ॐ भू० अंतर्वेदिसमु-द्भव जैमिनिसगोत्र कृष्णवर्ण भो केतो ! इ० केतवे नमः, केतुं० ॥ १ ॥ इति प्रतिष्ठाप्य यथाविधि सम्पूज्य प्रार्थयेत् । तत्र मन्त्रः—ब्रह्मा मुरारिस्त्रि-पुरान्तकारी भानुः शशी भूमिसुतो बुधश्च ॥ गुरुश्च शुक्रः शनिराहुकेतवः सर्वे ग्रहाः शान्तिकरा भवन्तु ॥ इति ॥

ततः यथाविधि कुशौ रतिकामयोर्मूर्तिं कृत्वा कलशे संस्थाप्य 'एतन्ते' मनोजूति०' इति प्रतिष्ठाप्य ग्रहान् सम्पूज्य रतिकामौ पूजयेत् ।

तत्र ध्यानम्—वारणो मदनं बाणपाशाङ्कुशशरासनान् ॥ धारयन्तं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जपारक्तं ध्यायेद्रक्तविभूषणाम् ॥ सव्येन पतिमाश्लिष्य वामेनोत्पलधारिणीम् । पाणिना रमणाङ्कस्थां रतिं सम्यग्विचिन्तयेत् ॥ इति ध्यात्वा "रतिकामाभ्यां नमः" इति नाममन्त्रेण आवाहनादि नीराजनान्तं सम्पूज्य यथाशक्ति वस्त्रादीनि समर्पयेत् । अन्ते माधवं स्तुवीत । दक्षिणां दद्यात् । ब्राह्मणाः कलशोदकेन यजमानमभिषिञ्चेत् । ततो याजमानो ब्राह्मणान् भोजयित्वा उत्सवादिना दिनशेषं नयेत् । नटनर्तकगायकेभ्योऽपि यथाशक्ति दद्यात् । तत्र दिने ब्राह्मणमुखेन वसन्तरागश्रवणम् । तत्प्रकारः—

पद्मापयोधरतटीपरिरम्भलग्नकाश्मीरमुद्रितमुरो मधुसूदनस्य ॥ व्यक्तानुरागमिव खेलदनङ्गखेदस्वेदाम्बुपूरमनुपूरयतु प्रियं वः ॥ १ ॥ वसन्ते

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बासन्तीकुसुमसुकुमारैरवयवैर्भ्रमन्तीं कान्तारे बहुविहितकृष्णानुसरणाम् ॥ अमन्दं कन्दर्पज्वरजनितचिन्ताकुलतया चलाद्वाधां राधां सरसमिद-मूचे सहचरी ॥ २ ॥

बसन्त राग रूपक ताल—ललितलवङ्गलतापरिशीलनकोमलमलयसमीरे। मधुकरनिकरकरम्बितकोकिलकूजितकुञ्जकुटीरे। विहरति हरिरिह सरसवसन्ते॥ नृत्यति युवतिजनेन समं सखि विरहिजनस्य दुरन्ते॥ ध्रुवपदम् ॥ उन्मदमदनम-नोरथपथिकवधूजनजनितविलापे॥ अलिकुलसंकुलसुमनसमूहनिराकुलवकुल-कलापे ॥ २ ॥ विहरति० ॥ मृगमदसौरभरभसवशंवदनवदलमालतमाले। युवजनहृदयविदारणमनसिजनखरुचिकिंशुकजाले ॥३॥ विहरति० ॥ मदनम-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हीपतिकनकदण्डरुचिकेसरकुसुमविकासे ॥ मिलितशिलीमुखपाटलपटलकृतस्मरतूणविकासे ॥४॥ विहरति० ॥ विगलितलज्जितजगदवलोकनतरुणवरुणकृतहासे । विरहिनिकृन्तनकुन्तमुखाकृतिकेतकिदन्तुरिताशे ॥ ५ ॥ विहरति० ॥ माधविकापरिमलललिते नवमालतिजातिसुगन्धौ ॥ मुनिमनसामपि मोहनकारिणि तरुणाकारणबन्धौ ॥ ६ ॥ विहरति० ॥ स्फुरदतिमुक्तलतापरिरम्भणमुकुलितपुलकितचूते । वृन्दावनविपिने परिसरपरिगतयमुनाजलपूते ॥७॥ विहरति० ॥ श्रीजयदेवभणितमिदमुदयतु हरिचरणस्मृतिसारम् ॥ सरसवसन्तसमयवनवर्णनमनुगतमदनविकारम् ॥ ८ ॥ दरविदलितमल्लीवल्लिचञ्चत्परागप्रकटितपटवासैर्वासयन् काननानि ॥ इह हि दहति चेतः केतकीगन्ध-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बन्धुः प्रसरदसमबाणप्राणवद्गन्धवाहः ॥ १ ॥ अद्योत्सङ्गवसद्भुजङ्गकवलक्लेशादिवेशाचलं प्रालेयप्लवनेच्छयाऽनुसरति श्रीखण्डशैलानिलः ॥ किंचस्निग्धरसालमौलिमुकुलान्यालोक्य हर्षोदयादुन्मीलन्ति कुहूः कुहूरितिकलोत्तालाः पिकानां गिरः ॥ २ ॥ उन्मीलन्मधुगन्धलुब्धमधुपव्याधूतचूताङ्कुरक्रीडत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः ॥ नीयन्ते पथिकैः कथं कथमपि ध्यानावधानक्षणप्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः ॥ ३ ॥ अनेकनारीपरिरम्भसम्भ्रमस्फुरन्मनोहारिविलासलालसम् ॥ मुरारिमारादुपदर्शयन्त्यसौ सखी समक्षं पुनराह राधिकाम् ॥ ४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# राग बसंत

खेलत बसंत राजाधिराज । देखत नभ कौतुक सुर-समाज ॥ १ ॥
सोहैं सखा-अनुज रघुनाथ साथ । झोलिन्ह अबीर पिचकारि हाथ ॥ २ ॥
बाजहिं मृदंग, डफ, ताल, बेनु । छिरकैं सुगन्ध भरे मलय-रेनु ॥ ३ ॥
उत युवति-जूथ जानकी संग । पहिरे पटभूषण सरसरंग ॥ ४ ॥
लिए छरी बेंत सोंधै विभाग । चाँचरि झूमक कहैं सरस राग ॥ ५ ॥
नूपुर किंकिनि—धुनि अति सुहाइ । ललना-गन-जब जेहिधरहिंधाइ ॥ ६ ॥
लोचन आँजहिं फगुआ मनाइ । छाड़हिं नचाइ हा हा कराइ ॥ ७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चढ़े खरनि विदूषक स्वाँग साजि। करैं कूटि, निपट गई लाज भाजि ॥ ८ ॥
नर-नारि परस्पर गारि देत। सुनि हँसत राम भाइन समेत ॥ ९ ॥
बरषत प्रसून बर-बिबुध-बृन्द। जय जय दिनकर-कुल कुमुद चंद ॥ १० ॥
ब्रह्मादिप्रसंसत अवध बास। गावत कल कीरति तुलसिदास ॥ ११ ॥

पं० कैलासनाथ भार्गव द्वारा—भार्गवभूषण प्रेस, त्रिलोचन काशी में मुद्रित।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

छप गया ! छप गया !! छप गया !!!

# आदि वाराहीपञ्चाङ्ग

आज तक आदिवाराहीपञ्चाङ्ग कहीं भी नहीं छपा है। काशी में मानमन्दिर घाट के समीप वाराही का प्रसिद्ध स्थान है, यहां एक वाराहीकूप भी है। वाराही के उपासकों के हितार्थ पं० प्रभुनारायण शर्मा ने इसका संग्रह किया है इसमें आदि वाराहीपद्धति, कवच, स्तोत्र, अष्टक, सहस्रनाम और यन्त्रोद्धार के सहित वाराही यन्त्र भी है। आजकल जो प्रचलित आरती पुष्पाञ्जलि स्तुति है उसका भी इसमें संग्रह है। मूल्य— ।)

पता—भार्गव पुस्तकालय, गायघाट, बनारस।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

* इति *

श्रीपञ्चमी (वसन्तपञ्चमी) व्रतपूजनप्रयोगः

* समाप्तः *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



For Private and Personal Use Only